# टिळक महाराष्ट्र विद्यापीठ, पुणे

**24E**

**संस्कृत विशारद (बी.ए.) – बहिःस्थ**

**परीक्षा : मे – २०२५**

**सत्र १ ले**

**विषयः पञ्चतन्त्र–काकोलूकीय (24E413)**

**दिनांक :१५/०५/२०२५** **गुण : १००** **वेळ : दु. २.०० ते दु. ५.००**

**सूचना :** सर्व प्रश्न अनिवार्य

**प्र. १) कानपि त्रीन् परिच्छेदान् माध्यमभाषया अनुवदत। (३०)**

१. अथ साधिते विविधतीर्थोदके, प्रगुणीकृतेऽष्टोत्तरशतमूलिकासङ्घाते प्रदत्ते सिंहासने वर्तिते सप्तद्वीपसमुद्रभूधरविचित्रे धरित्रीमण्डले, प्रसारिते व्याघ्रचर्मणि आपूरितेषु हेमकुम्भेषु, दीपेषु वाद्येषु च सज्जीकृतेषु माङ्गल्यवस्तुषु गीतपरे युवतीजने आनीतायामग्रमहिष्यां कृकालिकायाम् उलूकोऽभिषेकार्थं यावत्सिंहासने उपविशति तावत्कुतोऽपि वायसः समायातः। सोऽचिन्तयत्, ‘अहो, किमेष सकलपक्षिसमागमो महोत्सवश्च?’अथ ते पक्षिणस्तं दृष्ट्वा मिथः प्रोचुः, ‘पक्षिणां मध्ये वायसश्चतुरः श्रूयते। तदस्यापि वचनं ग्राह्यम्।’अथ वायसः समेत्य तानाह, ‘अहो किं महाजनसमागमोऽयं परममहोत्सवश्च?’ते प्रोचुः, ‘भो नास्ति कश्चिद् विहङ्गमानां राजा, तदस्योलूकस्य विहङ्गमराज्याभिषेको निरूपितस्तिष्ठति समस्तपक्षिभिः। तत्त्वमपि स्वमतं देहि, प्रस्तावे समागतोऽसि।’

२.अथ गते तस्मिन् गजयूथे शशकाः सोद्वेगा गजपादक्षुण्णसमावासाः केचिद्भग्नपादाः अन्ये जर्जरितकलेवरा रुधिरप्लुताः, अन्ये हतशिशवो बाष्पपिहितलोचनाः समेत्य मन्त्रं चक्रुः, ‘अहो। विनष्टा वयम्। नित्यमेवैतद् गजयूथमागमिष्यति, यतो नान्यत्र जलमस्ति। तत्सर्वेषां नाशो भविष्यति। तच्चिन्त्यतां कश्चिदुपायः।’तत्रैकः प्रोवाच, ‘गम्यतां देशत्यागेन। किमन्यत्। उक्तञ्च मनुना व्यासेन च–त्यजेदेकं कुलस्यार्थे ग्रामस्यार्थे कुलं त्यजेत्। ग्रामं जनपदस्यार्थे आत्मार्थे पृथिवीं त्यजेत्।।’ ततश्चान्ये प्रोचुः, ‘भोः, पितृपैतामहं स्थानं न शक्यते सहसा त्यक्तुम्। तत्क्रियतां तेषां कृते काचिद् बिभीषिका यत्कथमपि दैवान्न समायान्ति।’

३.मेघवर्ण आह ‘नूनं सद्यःफलानि नीतिशास्त्राणि यत्वयानुकूल्येनानुप्रविश्यारिमर्दनः सपरिजनो निःशेषितः। स्थिरजीव्याह – तीक्ष्णोपायप्राप्तिगम्योऽपि योऽर्थस्तस्याप्यादौ संश्रयः साधु युक्तः। उत्तुङ्गाग्रः सारभूतो वनानां, नानभ्यर्च्यश्छिद्यते पादपेन्द्रः।। अथवा, स्वामिन् ! किं तेनाभिहितेन, यद् अनन्तरकाले क्रियारहितम्, असुखसाध्यं वा भवति। साधु चेदमुच्यते – अनिश्चितैरध्यवसायभीरुभिः, पदे पदे दोषशतानुदर्शिभिः। फलैर्विसंवादमुपागता गिरः प्रयान्ति लोके परिहासवस्तुताम् ।। न च लघुष्वपि कर्तव्येषु धीमद्भिरनादरः कार्यः। यतः शक्ष्यामि कर्तुमिदमल्पमयत्नसाध्यमत्रादरः क इति कृत्यमुपेक्षणः। केचित्प्रमत्तमनसः परितापदुःखमापत्प्रसङ्गसुलभं पुरुषाः प्रयन्ति ।।

४.लुब्धकेन ततो मुक्ता दृष्ट्वाऽग्नौ पतितं पतिम् । कपोती विललापार्त्ता शोकसन्तापमानसा ।।<br>
न कार्यमद्य मे नाथ! जीवितेन त्वया विना। दीनायाः पतिहीनायाः किं नार्या जीविते फलम् ।।<br>
मानो दर्पस्त्वहङ्कारः कुलपूजा च बन्धुषु। दासभृत्यजनेष्वज्ञो वैधव्येन प्रणश्यति ।।<br>
एवं विलप्य बहुशः कृपणं भृशदुःखिता। पतिव्रता ससन्दीप्तं तमेवाग्निं विवेश सा।।<br>
ततो दिव्याम्बरधरा दिव्याभरणभूषिता । भर्तारं सा विमानस्थं ददर्श स्वं कपोतिका।।

**प्र. २) के अपि द्वे वाक्ये माध्यमभाषया ससन्दर्भं स्पष्टीकुरुत। (२०)**

१.बिलस्य वाणी न कदापि मे श्रुता।

२. शत्रवोऽपि हितायैव विवदन्तः परस्परम्।

३. चितिकां दीपितां पश्य फटां भग्नां ममैव च।

**प्र. ३) अ. रूपपरिचयं कारयत।** **(१०)**

| | | | |
|---|---|---|---|
| १. शत्रवः | २. भर्तारम् | ३. कृतम् | ४. दृष्ट्वा |
| ५. लुब्धकेन | ६. कथयति | ७. यानि | ८. पश्य |
| ९. परित्यजन्तु | १०. अब्रवीत | ११. युष्माभिः | १२. पुरुषाणाम् |

**आ. पञ्च सन्धीन् विघटयत।** **(१०)**

| | | |
|---|---|---|
| १.तच्छ्रुत्वा | २. हितायैव | ३. मांसैर्निमन्त्रितः |
| ४. कस्मिंश्चिदधिष्ठाने | ५. एवञ्च | ६. भूतार्थास्तस्य |

**इ. पञ्चानां समासानां विग्रहं कृत्वा नामानि लिखत।** **(१०)**

| | | |
|---|---|---|
| १. भयव्याकुलः | २. गजयूथः | ३. कपोतदेहः |
| ४. शोकाविष्टः | ५. पतिहीना | ६. पुत्रबुद्धिः |

**ई. कानपि दश वाक्यान् सूचनानुसारं परिवर्तयत।** **(१०)**

१.मुहूर्तं परिपालय। (भवान् इति कर्तृपदं योजयित्वा वाक्यं पुनर्लिखत।)
२. सः अचिन्तयत्। (वाक्यं लोट्लकारे परिवर्तयत।)
३. अकारणं वैरम् आसादितं मया। (वाच्यपरिवर्तनं कुरुत।)
४. किं ------- त्वां प्रयच्छामि। (इदम् सर्वनाम्नः योग्यं रूपं योजयित्वा वाक्यं पुनर्लिखत।)
५. व्यासेन मनुना च उक्तम्। (वाच्यपरिवर्तनं कुरुत।)
६. ब्राह्मणः कथयति स्म। (स्म निष्कासयत।)
७. वयं रात्रौ न पश्यामः। (वाक्यमेकवचने परिवर्तयत।)
८. त्वमपि स्वाभिप्रायं वद। (त्वं स्थाने भवान् इति कर्तृपदं योजयित्वा वाक्यं पुनर्लिखत।)
९. दग्धां गुहां पश्य। (वाक्यं बहुवचने परिवर्तयत।)
१०. स्वगृहे वर्तते भवान्। (वाक्यं लङ्लकारे परिवर्तयत।)
११. जलपानेन ते स्वस्थतां व्रजन्ति। (वाक्यं लोट्लकारे परिवर्तयत।)
१२. शशकाः सुखेन वसन्ति। (वाक्यमेकवचने परिवर्तयत।)

**प्र. ४) काकोलूकीयस्थां कामपि एकां कथां स्वशब्देन संस्कृतभाषया लिखत।** **(१०)**

----------